अथ नायकसहायभेदप्रकरणम्

अथैतस्य सहायाः स्युः पञ्चधा चेटको विटः।
विदूषकः पीठमर्दः प्रियनर्मसखस्तथा॥ १॥

नर्मप्रयोगे नैपुण्यं सदा गाढानुगागिता।
देशकालज्ञता दाक्ष्यं रुष्टगोपीप्रसादनम्।
निगूढमन्त्रतेत्याद्याः सहायानां गुणाः स्मृताः॥ २॥

तत्र चेटः

सन्धानचतुरश्चेटो गूढकर्मा प्रगल्भधीः।
स तु भङ्गुरभृङ्गारादिकः प्रोक्तोऽत्र गोकुले॥ ३॥

यथा

न पुनरिदमपूर्वं देवि कुत्रापि दृष्टं
शरदि यदियमारान्माधवी पुष्पिताभूत्।
इति किल वृषभानोर्लम्भितासौ कुमारी
व्रजनवयुवराज व्याजतः कुञ्जवीथिम्॥ ४॥

अथ विटः

वेशोपचारकुशलो धूर्तो गोष्ठीविशारदः।
कामतन्त्रकलावेदी विट इत्यभिधीयते।
कडारो भारतीबन्धुरित्यादिर्विट ईरितः॥ ५॥

यथा

व्रजे सारङ्गाक्षीविततिभिरनुल्लङ्घ्यवचनः
सखाहं तद्बन्धोश्चटुभिरभियाचे मुहुरिदम्।
कलक्रीडद्वंशीस्थगितजगतीयौवतधृतिस्
त्वया युक्तः श्यामे न खलु परिहर्तुं सखि हरिः॥ ६॥

अथ विदूषकः

वसन्ताद्यभिधो लोलो भोजने कलहप्रियः।
विकृताङ्गवचोवेषैर्हास्यकरी विदूषकः।
विदग्धमाधवे ख्यातो यथासौ मधुमङ्गलः॥ ७॥

यथा

तुष्टेन स्मितपुष्पवृष्टिरधुना सद्यस्त्वया मुच्यताम्
आरूढः कुतुकी विमानमतुलं मां गोकुलाखण्डलः।
इत्थं देवि मनोरथेन रभसादभ्यर्थ्यमानोऽप्यसौ
यत्ते मानिनि नाधरः प्रयतते तन्नाद्भुतं रागिषु॥ ८॥

यथा वा

ममोपहरति स्वयं भवदभीष्टदेवो नमन्
नवं कमलमुज्ज्वलं कमलबन्धुरुत्कण्ठया।
मया तु तदवज्ञया भुवि निरस्यते रुष्यता
न मानयसि मद्वचस्तदपि मानिनि त्वं कुतः॥ ९॥

अथ पीठमर्दः

गुणैर्नायककल्पो यः प्रेम्णा तत्रानुवृत्तिमान्।
पीठमर्दः स कथितः श्रीदामा स्याद्यथा हरेः॥ १०॥

यथा

कालिन्दीपुलिने मुकुन्दचरितं विश्वस्य विस्मापनं
द्रष्टुं गच्छति गोष्ठमेव निखिलं नैकात्र चन्द्रावली।
ब्रूमस्तस्य सुहृत्तमाः स्वयममी पथ्यञ्च तथ्यञ्च ते
मा गोवर्धनमल्ल घट्टय मुधा गोवर्धनोद्धारिणम्॥ ११॥

यथा वा

तवेयं श्रीदामन्भणितिरिह विश्रम्भयति मां
प्रसादो रुद्राण्याः किमिव चपलासु प्रसरतु।
वने यान्तीं दुर्गार्चनघुसृणमाल्याङ्कितकरां
वधूं दृष्ट्वा शङ्के प्रथयति कलङ्कं खलजनः॥ १२॥

अथ प्रियनर्मसखः

आत्यन्तिकरहस्यज्ञः सखीभावसमाश्रितः।
सर्वेभ्यः प्रणयिभ्योऽसौ प्रियनर्मसखो वरः।
स गोकुले तु सुबलस्तथा स्यादर्जुनादयः॥ १३॥

यथा

प्रत्यावर्तयति प्रसाद्य ललनां क्रीडाकलिप्रस्थितां
शय्यां कुञ्जगृहे करोत्यघभिदः कन्दर्पलीलोचिताम्।
स्विन्नं बीजयति प्रियाहृदि परिस्रस्ताङ्गमुच्चैरमुं
क्व श्रीमानधिकारितां न सुबलः सेवाविधौ विन्दति॥ १४॥

यथा वा

याभिः साचिदृगञ्चलेन चटुलं कंसारिरालिह्यते
दोर्द्वन्द्वेन कुचोपपीडमुरसि स्वैरं परिष्वज्यते।
एतस्याधरसीधुरुद्धुरतया सामोदमास्वाद्यते
किं जानासि सखे व्यधायि कतरद्गोपीभिराभिस्तपः॥ १५॥

चतुर्धाः सखायोऽत्र चेटः किङ्कर ईर्यते।
पीठमर्दस्य वीरादावपि साहाय्यकारिता॥ १६॥

हरिप्रियाप्रकरणे वक्ष्यन्ते यास्तु दूतिकाः।
अत्रापि ता यथायोग्यं विज्ञेया रसवेदिभिः॥ १७॥

तत्र स्वयं यथा

सखि माधवदृग्दूत्याः कर्मठता कार्मणे विचित्रास्ति।
उपधाशुद्धापि यया रुद्धा त्वं चित्रितेवासि॥ १८॥

वंशी यथा श्रीललितमाधवे (1.24)

ह्रियमवगृह्य गृहेभ्यः कर्षति राधां वनाय या निपुणा।
सा जयति निसृष्टार्था वरवंशजकाकली दूती॥ १९॥

आप्तदूती

वीरावृन्दादिरप्याप्तदूती कृष्णस्य कीर्तिता ।
वीरा प्रगल्भवचना वृन्दा चाटूक्तिपेशला ॥ २० ॥

यथा

विमुखी मा भव गर्विणि
मद्गिरि गिरिणा धृतेन कृतरक्षम् ।
मूढे समूढवयसं
माधव माधाव रागेण ॥ २१ ॥

यथा वा

वृन्दा सुन्दरि वन्दनं विदधती यत्पृच्छति त्वामसौ
चञ्चन्मञ्जुलखञ्जरीटनयने तत्रोत्तरं व्यञ्जय ।
केयं भ्रूभुजगी तवातिविषमा बंभ्रम्यते यद्भिया
क्लान्तः कालियमर्दनोऽपि कुरुते नाद्य प्रवेशं व्रजे ॥ २२ ॥

अस्यासाधारणा दूत्यो वीवाद्याः कथिता हरेः ।
लिङ्गिन्यन्तास्तु वक्ष्यन्ते यास्ताः साधारणा द्वयोः ॥ २३ ॥

इति श्रीश्रीमदुज्ज्वलनीलमणौ नायकसहायभेदप्रकरणम् ॥ २ ॥